त्मनः” भा०शा०२०८। “देवौ तस्यामजायेतामश्विनौ भिषजां वरौ। नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति” हरिवं० ९ अ०। नासत्यदस्रयोर्द्वन्द्वचारित्वात् द्विवचनान्तता ६हिंस्रे त्रि०। ७शिशिरे न० संक्षिप्तसारः।

**दस्रदेवता** स्त्री० दस्रौ देवता अस्य। अश्विनीतारायां हेम०। अश्वियमदहनेत्यादिवाक्ये तस्या दस्रदैवत्यमनुसन्धेयम्।

**दस्रसू** स्त्री० दस्रौ सूते सू-क्विप्। सूर्य्यपत्न्यां त्वष्टृकन्यायां संज्ञायाम् त्रिका० अश्विनीकुमारशब्दे दृश्यम्

**दह** दीप्तौ अक० दाहे सक०चु०उभ० सेट् इदित्। दंहयति ते अददंहत् त।

**दह** दाहे भस्मीकरणे सक०भ्वा०प०अनिट्। दहति अधाक्षीत् ददाह देहतुः। दग्धा दह्यात् धक्ष्यति। दग्धः दग्धिः दग्ध्वा दग्धव्यः दहनीयः दाह्यः। दाहः दहनम्। दाहयति अदीदहत् दिधक्षति “उष्णो दहति चाङ्गारः शीतः कृष्णायते करम्” हितो० “क्रुद्धं कुलं धक्ष्यति विप्रवह्निः”भट्टिः दृष्टान्-ङ्गारकारीव मैनान् धाक्षीः समूलकान्” भा०स०। ६०अ० “दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः”सा०द०“देहं धारणयाग्नेय्या दग्ध्वा धामाविशत् स्वकम्” भाग० “दग्धव्योऽसौ कटाग्निना” मनुः। “कर्म्मणि दह्यते अदाहि देहे। “दह्यते च कुलं सर्वम्”चाणक्यः। “देहे लङ्का मतेश्वरा” भट्टिः दंदह्यते। “दंदह्यमाना शोकेन” भट्टिः।

**दहदहा** स्त्री कुमारानुचरमातृभेदे “ख्याता दहदहा चैव तथा धमधमेति च” भा० श०४७अ०दह दहेति वक्ति मयूरव्यं० कर्त्तारं चाभिदधातीति कर्त्तरि अयं साधुः एवं धमधमेत्यत्रापि बोध्यम्।

**दहन** पु० दह-ल्यु। १अग्नौ, “दवदहनस्तुहिनदीधितिस्तस्य”सा०द०“दह दहन! तदेतत् पापमङ्गं मदीयम्” सीतोक्तिः। २चित्रकवृक्षे, ३भल्लातके, ४दुष्टचेतसि च। ५कपोते पुंस्त्री० राजनि०स्त्रियां जातित्वात् ङीष्। ६दाहकमात्रे त्रि०।लोकदहन! मनो दहन इत्यादि। ७रुद्रभेदे पु०।“एकादश सुताः स्थाणोः ख्याताः परमतेजसः। मृगव्याधश्च सर्पश्च निर्ऋतिश्च महायशाः,। अजैकपादहिर्बुध्न्यः पिनाकी च परन्तपः। दहनोऽथेश्वरश्चैव कपाली च महाद्युतिः, स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः” भा० आ० ६६ अ०। उपचारात् ८कृत्तिकानक्षत्रे “दहनविधिशताख्यामैत्रभं सौम्यवारे” ज्यो० त०। भावे ल्युट्। ९दाहे न०। “अपरो दहने स्वकर्म्मणां ववृते ज्ञानमयेन वह्निना” रघुः।

**दहनकेतन** पु०न० दहनस्य केतन इव। धूमे हेमच०।

**दहनप्लुष्ट** त्रि०दहनादिव प्लुष्टं प्लोषणं यस्मात्। वैद्यकप्रसिद्धे (वेलेस्तारा) पदार्थे अग्निप्लुष्टादयोऽप्यत्र। तत्प्रदाने हि देहे वह्नेरिव प्लोषणं (फोसका) भवतीति प्रसिद्धिः।

**दहनप्रिया** स्त्री ६त०। स्वाहायामग्निभार्य्यायाम् त्रिका०

**दहनर्क्ष** न०६त०। कृत्तिकानक्षत्रे “यदा विशाखासु महेन्द्रमन्त्री सुतश्च भानोर्दहनर्क्षयातः” वृ० सं० १० अ०। दहनभादयोऽप्यत्र।

**दहनसारथि** पु०६त०। वायौ।“दक्षिणदहनसारथिरयाहततचञ्चलचूतकलिके” दशकु०। दहनसहचरादयोऽप्यत्र।

**दहनागुरु** न०दहनस्य दाहाय अगुरु।दाहागुरुणि राजनि०

**दहनाराति** पु० ६त०। जले राजनि०। तस्य वह्निनाशकत्वात् तथात्वम् दहनरिपुप्रभृतयोऽप्यत्र।

**दहनोपल** पु० दहनाय वह्नये हितः उपलः (आतसी) सूर्य्यकान्तमणौ हेम०। सूर्य्यकिरणसम्पर्केण हि ततो वह्नेः प्रादुर्भावात् तस्य तथात्वम्।

**दहनोल्का** ६०। विस्फुलिङ्गरूपायामुल्कायाम् त्रिका०

**दहर** पु० दह-अर। १मूषिकायां २स्वल्पे ३भ्रातरि ४बालके च मेदि०। ५अतिसूक्ष्मे ६दुर्बोधे च “अथ यदिदं दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्” छा०उ०। तत्र स्वल्पे “नेष्टा पत्नीमानेष्यन् कौशं वासः परिधापयति चण्डातकं दहरं वा” कात्या०श्रौ० १४।५।२ “परिधापयतीति कारितत्वाद्धेत्रषणात्र भवति चण्डातकं चलनक उच्यते एवं ह्यभियुक्तोपदेशः अर्द्धोरुकं विलासिन्या वासश्चण्डातकं विदुः” दहरं तु कौपीनम् दहरशब्दस्याल्पवाचकत्वात्” कर्कः। २नरके ३वरुणे च उणादि०।

**दहराकाश** पु० कर्म्म०। चिदाकाशे ईश्वरे।

**दह्र** पु०दह-रक्। १दावाग्नौ २जठरे च। “सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः” भाग०४।१।३० “दह्राग्निः जठराग्निः” श्रीधरःस्वल्पार्थस्यैवात्र कर्मधारयः जठरस्थस्याग्नेः स्वल्पत्वात् इत्यन्ये।

**दा** दाने भ्वा०पर० सक० सेट् ण इत्। यच्छति प्रणियच्छति अदात्। ददौ ददतुः। देयात्। दास्यति। देयम् दानीयं दातव्यं दत्तः दातुम् दत्त्वा।